तत्क्षणादेव चाप्नोति सत्यं सत्यं सुनिश्चितम् ॥"
इति च तन्त्रसारः ॥

हनूः, स्त्री, ( हनु+पचे ऊङ् । ) हनुः । इत्यमरटीकायां भरतः ॥ ( यथा,—
"शाखासु हन्वोः कव्याच्च चेष्टावन्तस्तु सन्धयः ॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥ )

हनूमान्, [त्] पु, ( हनूरस्यास्तीति । हनू+मतुप् । ) हनुमान् । इति त्रिकाण्डशेषः ॥ ( यथा, महाभारते । ३ । १४७ । २७ ।
"अहं केशरिणः क्षेत्रे वायुना जगदायुना ।
जातः कमलपत्राक्ष हनूमान्नाम वानरः ॥" )

हनूषः, पुं, ( हन्ति मानुषानिति । हन+"ऋहनिभ्यामूषन् ।" उणा० ४।७३। इति ऊषन् । ) राक्षसः । इति त्रिकाण्डशेषः ॥

हन्त, व्य, हर्षः । अनुकम्पा । ( यथा, गीतायाम् । १० । १९ ।
"हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥" )
वाक्यारम्भः । विषादः । इत्यमरः । ३।३।२४३ ॥
( यथा, भ्रमराष्टके । ८ ।
"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥" )
अर्त्तिः । वादः । संभ्रमः । इति शब्दरत्नावली ॥ खेदः इति मेदिनी ॥ ( यथा, रामायणे ।
"काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥"
धनञ्जयपालः ॥ इत्यजयपालः ॥

हन्तकारः, पुं, ( हन्त इत्यस्य कारः करणम् । ) अतिथिदेयतण्डुलम् । इति केचित् ॥ हन्तशब्दः । यथा । यत्तु ।
"निवीतो हन्तकारेण मनुष्यांस्तर्पयेदथ ।
कुशस्य मध्यदेशेन तीर्थेन उदङ्मुखः ॥"
इति लघुविष्णूक्तम् ॥
हन्तप्रयोगेण जलदानमुक्तं तत् सनकादिप्रत्येकतर्पणे । यथा । सनकस्तृप्यतां तस्मैतदुदकं हन्त इत्यादौ । न तु पद्मपुराणीयमिलिततर्पणे । इत्याह्निकाचारतत्त्वम् ॥ * ॥ अतिथये दानार्थषोड़शग्रासाः । यथा,—
"पूजयेदतिथिं नित्यं नमस्येदर्चयेद्द्विजम् ।
मनोवाक्कर्मभिः शान्तमागतं स्वगृहन्ततः ॥
हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः ।
दद्यादतिथये नित्यं बुद्ध्या तं परमेश्वरम् ॥
भिक्षामाहुर्ग्रासमात्रमग्रञ्च स्याच्चतुर्गुणम् ।
पुष्कलं हन्तकारञ्च तच्चतुर्गुणमुच्यते ॥"
इति कूर्म्मपुराणे उपविभागे । १८।११३-११५ ॥
अपि च ।
"भिक्षाञ्च याचतां दद्यात् परिव्राड्ब्रह्मचारिणाम् ।
ग्रासप्रमाणं भिक्षा स्यादग्रं ग्रासचतुष्टयम् ॥
अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः ।
भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्त्वा तु न भोक्तव्यं यथाविभवमात्मनः ॥"
इति मार्कण्डेयपुराणे मदालसोपाख्याने । २९ । ३४—३६ ॥

हन्ता, [ ऋ ] त्रि, ( हन्तीति । हन+तृच् । ) हननकर्त्ता । यथा, भट्टौ ५ सर्गे ।
"भवन्तं कार्त्तवीर्य्यो यो हीनसन्धिमचीकरत् ।
जिगाय तस्य हन्तारं स रामः सार्व्वलौकिकः ॥"

हन्तुः, पुं, मृत्युः । वृषः । हनधातोः तुप्रत्ययेन निष्पन्नः । इति केचित् ॥ (विनाशः । यथा, भागवते । ११ । ५ । ५० ।
"भूभारासुरराजन्यहन्तवे गुप्तये सताम् ।
अवतीर्णस्य निर्वृत्यै यशो लोके वितन्यते ॥" )

हन्तोक्तिः, स्त्री, ( हन्त इत्यस्य उक्तिः । ) अनुकम्पोक्तिः । इति केचित् ॥

हन्नः, त्रि, ( हद्+क्तः । ) कृतपुरीषोत्सर्गः । इत्यमरः । ३ । १ । ८६ ॥

हन्यमानः, त्रि, ( हन+कर्म्मणि शानच् । ) वर्त्तमानहननीयवस्तु । हनधातोः कर्म्मणि शानप्रत्ययेन निष्पन्नः । यथा,—
"हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।
अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥

हपुषा, स्त्री, वणिग्द्रव्यविशेषः । तत्तु मरीचहन्तवद्दीर्घकृष्णवर्णवस्तु । हबुष् इति ख्यातम् । इति वैद्याः ॥ हौहवेर इति हिन्दीभाषा । तत् द्विविधम् । तन्मध्ये प्रथमं फलं मत्स्यसदृशं विस्रगन्धम् । द्वितीयमश्वत्थफलसदृशं मत्स्यगन्धम् । तयोर्नामानि गुणाश्च ।
"हपुषा वपुषा विस्रा पराश्वत्थफला स्मृता ।
मत्स्यगन्धा प्लीहहन्त्री विषघ्नी ध्वाङ्क्षनाशिनी ॥
हपुषा दीपनी तिक्ता कटूष्णा तुवरा गुरुः ।
पित्तोदरप्रमेहार्शोग्रहणीगुल्मशूलहृत् ॥
पराप्येतद्‌गुणा प्रोक्ता रूपभेदो द्वयोरपि ॥"
इति भावमिश्रकृतभावप्रकाशः ॥ * ॥
अपि च ।
"हपुषा हबुषा विस्रा विस्रगन्धा विगन्धिका ।
अन्या चासौ स्वल्पफला कच्छुघ्नी ध्वाङ्क्षनाशिनी ॥
प्लीहशत्रुर्विषघ्नी च कफघ्नी चापराजिता ।
पूर्व्वा तु पञ्चनाम्नी स्यादपरा सप्तधाभिधा ॥
हपुषा कटुतिक्तोष्णा गुरुश्लेष्मबलासजित् ।
प्रदरोदरविष्टम्भशूलगुल्मार्शसां हरा ॥"
इति श्रीनरहरिपण्डितविरचितराजनिर्घण्टे शताह्वादिवर्गश्चतुर्थः ॥

हबुषा, स्त्री, हपुषा । इति राजनिर्घण्टः ॥

हम्बा, स्त्री, गोध्वनिः । तत्पर्य्यायः । हम्भा २ रेभणम् ३ । इति जटाधरः ॥ हम्भा ४ रम्भा ५ । इति हेमचन्द्रः ॥ ( यथा, महाभारते । १ । १६६ । ३१ ।
"क्रोधरक्तेक्षणा सा गौर्हम्बारवघनस्वना ।
विश्वामित्रस्य तत्सैन्यं व्यद्रावयत सर्व्वशः ॥" )

हम्भा, स्त्री, गोध्वनिः । इति हेमचन्द्रः । त्रिकाण्डशेषश्च ॥

हम्म, गतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) मद्यान्तः । हम्मति । इति दुर्गादासः ॥

हय, क्लमे । गतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-क्लमे अक०-गतौ सक०-सेट् । ) हयति । क्लमो ग्लानिः । इति दुर्गादासः ॥

हयः, पुं, ( हयति गच्छतीति । हय+अच् । हिनोतीति । हि+अच् वा । ) घोटकः । इत्यमरः । २ । ८ । ४४ ॥ अथ हयायुर्व्वेदः ।
धन्वन्तरिरुवाच ।
"हयायुर्व्वेदमाख्यास्ये हयैः सर्व्वार्थरक्षणम् ।
काकुटो कृष्णजिह्वश्च कृष्णाख्यः कृष्णतालुकः ॥
करालो हीनदन्तश्च शृङ्गी चाधिकदन्तकः ।
एकाण्डश्चैव जाताण्डः कञ्चुकी द्विखुरी स्तनी ॥
मार्जारपादो व्याघ्राभः कुष्ठविद्रधिसन्निभः ।
यमजो वामनश्चैव मार्जारकपिलोचनः ॥
एतद्दोषो हयस्त्याज्य उत्तमोऽश्वश्चतुष्करः ।
एते दोषाश्च कथिता हयहस्त्यादिषूत्तमाः ॥
मध्योऽर्द्धहस्तहीनोऽश्वो मुष्टिहस्तविहीनकः ।
कनीयांश्चार्द्धमानः स्यादर्द्धसमस्तु दीर्घतः ॥
पञ्चमुष्टिहीनः पञ्चोन उत्तमायास्तु दीर्घतः ।
असंहता ये च वाहा क्रूरकर्णास्तथैव च ॥
स्वरनेत्रप्रभावेषु न दीनाश्चिरजीविनः ।
रेवन्तपूजनाद्धोमाद्रक्षा स्यात् द्विजभोजनात् ॥
लोहकं निम्बपत्राणि गुग्गुलुसर्षपा घृतम् ।
तिलश्चैव वचा हिङ्गु बध्नीयाद्वाजिनां गले ॥
आगन्तुकं दोषजन्तु व्रणं द्विविधमीरितम् ।
चिरपाकं खरं वातात् पित्तजं क्षिप्रपाकिकम् ॥
कण्डूदाहालकं पित्तात् सोन्मादं मन्दवेदनम् ।
घनं कफात् सन्निपातात् सर्व्वरूपं त्रिदोषजम् ॥
आगन्तुकन्तु शस्त्राद्यैर्दुष्टव्रणविशोधनम् ।
दन्तीमूलं हरिद्रे द्वे चित्रकं विश्वभेषजम् ॥
रसोनं सैन्धवं वापि तक्रकाञ्जिकपेषितम् ।
तिलशक्तुकपिण्डोका दधियुक्ता ससैन्धवा ॥
निम्बपत्रयुतं पिण्डं तिलैः शोधनरोपणम् ।
करवीरकदम्बार्कस्नुहीकुटजचित्रकैः ॥
भल्लातस्य पचेत्तैलं नाड़ीव्रणहरं परम् ।
पञ्चवल्कलकल्केन घृतेन च प्रलेपयेत् ॥
द्वे हरिद्रे विड़ङ्गानि तथा लवणपञ्चकम् ।
पटोलं निम्बपत्रञ्च वचा चित्रकमेव च ॥
पिप्पली शृङ्गवेरञ्च चूर्णमेकत्र कारयेत् ।
एतत्पानं कृमिश्लेष्ममदानिलविनाशनम् ॥
निम्बपत्रं पटोलञ्च त्रिफला खदिरं तथा ।
क्वाथयित्वा ततो वाहं स्नातकं विचक्षणः ।
व्रणशमेव प्रदातव्यं पानं कुष्ठोपशान्तये ॥
व्रणेषु च कुष्ठेषु तैलं सर्षपजं हितम् ।
पञ्चवल्कलतैलं वा दशमूलञ्च शोपनुत् ॥
लशुनादीन् वदे कल्पान् मुक्तिपानान्तलेपतः ।
मातुलुङ्गरसोपेतं मांसलारसकेन वा ॥"
मांसलाख्याने मांसानामिति च पाठः ।